# || अथ श्री सप्तश्लोकी दुर्गा ||

## शिव उवाच

देवी त्वम भक्तसुलभे सर्वकार्य विधायनी | कलौ हि कार्यसिद्धयर्थ मुपायं ब्रूहि यतनत: ||

## देव्यु उवाच

श्रृणु देव प्रवक्ष्यामि कलौ सर्वेष्टसाधनम् | मया तवैव स्नेहेनाप्यम्बास्तुतिः प्रकाश्यते ||

## विनियोगः

ॐ अस्य श्रीदुर्गा सप्तश्लोकी स्तोत्र मन्त्रस्य नारायण ऋषिः, अनुष्टुप छन्दः श्रीमहाकाली महालक्ष्मी महासरस्वत्यो देवताः श्री जगदम्बा प्रीत्यर्थं सप्तश्लोकी दुर्गापाठे विनियोगः ।

ॐ ज्ञानिनामपि चेतांसि देवि भगवती हिसा । बलादाकृष्य मोहाय महामाया प्रयच्छति ॥1 ॥

दुर्गे स्मृता हरसि भीतिमशेषजन्तोः, स्वस्थैः स्मृता मतिमतीव शुभां ददासि ।
दारिद्रयदुःखभयहारिणि का त्वदन्या, सर्वोपकारकरणाय सदार्द चित्ता ॥2 ॥

सर्वमंगलमांगल्ये शिवे सर्वार्थसाधिके । शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तु ते ॥3॥

शरणागतदीनार्तपरित्राणय परायणे । सर्वस्यार्तिहरे देवि नारायणि नमोऽस्तु ते ॥4॥

सर्वस्वरूपे सर्वेशे सर्वशक्तिसमन्विते । भयेभ्यस्त्राहि नो देवि दुर्गे देवी नमोऽस्तु ते ॥5॥

रोगानशेषानपहंसि तुष्टा रुष्टा तु कामान् सकलानभीष्टान् । त्वामाश्रितानां न विपन्नराणां त्वामाश्रिता ह्याश्रयतां प्रयान्ति ॥6॥

सर्वाबाधाप्रशमनं त्रैलोक्यस्याखिलेश्वरि । एवमेव त्वया कार्यमस्मद्वैरि विनाशनम् ॥7॥

## ॥इति श्रीसप्तश्लोकी दुर्गा संपूर्णम्॥

## ॐ नमः चण्डिकायै | ॐ श्री दुर्गार्पणंमस्तु |

www.hanumanchalisalyric.com